# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल २०१६

कक्षा - आचार्यः - २ (Sem 4) | प्रश्नपत्रम् - ३ | गुणाः - ७०
विषयः - नव्यव्याकरणम् | कोड - CC 5.4.11 | समयः - ३:०० तः ६:००
दिनाङ्कः - १९.४.२०१६ | ग्रन्थः - वैयाकरणभूषणसारः

---

**प्रथमान्वितिः (युनिट - १)**

**प्रश्नः १** धात्वर्थविषयकं नैयायिकमतखण्डनपूर्वकं वैयाकरणमतं समुपस्थापनीयम् **(४)**

**अथवा**

निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते। न तु प्राप्ये कर्मणीति सिद्धान्तो हि व्यवस्थितः॥

अस्याः कारिकायाः यथाग्रन्थं व्याख्या कार्या।

**प्रश्नः २** धात्वर्थविषयकं मीमांसकमतखण्डनपूर्वकं वैयाकरणमतं समुपस्थापनीयम् **(१२)**

**अथवा**

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः। फले प्रधानं व्यापारः तिङर्थस्तु विशेषणम्॥

अस्याः कारिकायाः यथाग्रन्थं विस्तृतं व्याख्यानं कार्यम्।

**प्रश्नः ३ निम्नलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानां लघूत्तरं देयम्** **(४)**

क. 'पाकं करोति' कस्य विवरणम् अस्ति?

ख. नैयायिकानां मते कः आख्यातार्थो भवति?

ग. मीमांसकानां मते कः आख्यातार्थो भवति?

घ. मीमांसकानां मते कः धात्वर्थो भवति?

ङ. तङ्-प्रत्ययः कस्य द्योतको वर्तते?

च. भावना कस्य पर्यायवाची शब्दो वर्तते?

**द्वितीयान्वितिः (युनिट - २)**

**प्रश्नः ४ निम्नलिखितयोः कारिकामेकामाश्रित्य व्याख्या कार्या** **(४)**

क. अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना। अन्यत्राऽशेषभावात्तु सा तथा न प्रकाशते॥

ख. फलव्यापारयोरेकनिष्ठतायामकर्मकः। धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः।

**प्रश्नः ५** वैयाकरणभूषणसारानुसारम् अष्टके के के सन्ति, तेषां क्रियया सह कथम् अन्वयो भवति इति सर्वं सोदाहरणं प्रतिपादनीयम्। **(१२)**

**अथवा**

आख्यातशब्दे भागाभ्यां साध्यसाधनरूपता। प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः॥

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना। सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः॥

अनयोः कारिकयोः स्वाधीतग्रन्थदिशा व्याख्या विधेया।

**प्रश्नः ६ निम्नलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानां लघूत्तरं देयम्** **(४)**

क. नञः कति अर्थाः सन्ति?

ख. कारकस्य अन्वयः कुत्र भवति?

ग. 'धातुः' संज्ञा केन सूत्रेण भवति?

घ. “कारके” सूत्रे कारक-शब्दस्य भूषणकारानुसारंकोऽर्थः?

ङ. धातुरूपनिबन्धना का क्रिया भवति?

च घञादिनिबन्धनः को भवति?

**तृतीयान्वितिः (युनिट- ३)**

**प्रश्नः ७ निम्नलिखितयोरेकस्य प्रश्नस्य उत्तरं लेख्यम्** (४)

क. लिट्-लकारस्य अर्थः ग्रन्थदिशा प्रतिपादनीयः।

ख. दशसु लकारेषु कस्य लकारस्य कोऽर्थः इति सविस्तरं प्रतिपाद्यताम्

**प्रश्नः ८** तिङः के के अर्थाः सन्ति? तेषाम् अर्थानां कदा कुत्र अन्वयो भवति? इति सर्वं लेखनीयम्। (८)

**अथवा**

मीमांसकमतेन लकारार्थः प्रतिपादनीयः।

**प्रश्नः ९ निम्नलिखितेषु त्रयाणां प्रश्नानां लघूत्तरं देयम्** (३)

क. लकारस्य कति अर्थाः सन्ति? के च ते?

ख. शबादिसमभिहारे लकारस्य कः अर्थः भवति?

ग. नैयायिकानां मते लकाराणाम् अर्थः अस्ति अथवा तिङाम्?

घ. वैयाकरणानां मते लकाराणाम् अर्थः अस्ति अथवा तिङाम्?

ङ. उभयसमभिहारे लकारस्य कः अर्थः भवति?

**चतुर्थी अन्वितिः (युनिट– ४)**

**प्रश्नः १० निम्नलिखियोरेकस्य प्रश्नस्य उत्तरं लेख्यम्** (४)

क. समासादि-पञ्चवृत्तीनां नामोल्लेखं कुर्वन् वृतिं विवेचयतु।

ख. वृत्तेर्द्वैविध्यं प्रतिपादनीयम्।

**प्रश्नः ११** सामर्थ्यविषयकं नैयायिकमतं मीमांसकमतञ्च प्रतिपाद्य तयोः खण्डनं वैयकरणमतानुसारंविधातव्यम्। (८)

**अथवा**

व्यपेक्षावादिनां नैयायिकमीमांसकादीनां मतं समुपस्थापनीयम्।

**प्रश्नः १२ निम्नलिखितेषु त्रयाणां प्रश्नानां लघूत्तरं देयम्** (३)

क. जहत्स्वार्थायाः किम् उदाहरणम्?

ख. अजहत्स्वार्थायाः किम् उदाहरणम्?

ग. अवयवार्थस्य ग्रहणं कस्यां वृत्तौ भवति?

घ. कस्यां वृत्तौ अवयवार्थस्य ग्रहणं न भवति?

ङ. सामर्थ्य-शब्दे कः प्रत्ययो विद्यते?

***